गेल डी ए वी पब्लिक विद्यालयः
कार्यफलकम् संख्या –1
संस्कृतम्   कक्षा नवमी 2026–27

**(1) अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**

एकस्मिन् वने एकः विशालः वृक्षः आसीत्। तस्मिन् वृक्षे बहवः खगाः वसन्ति स्म। एकदा ते अतीव बुभुक्षिताः आसन् अतः भोजनम् अन्वेष्टुम् इतस्ततः भ्रमन्ति स्म। ते दूरं दूरम् अगच्छन्। अन्ते च एकस्मिन् क्षेत्रे तण्डुलकणान् अपश्यन्। ते तत्र गत्वा प्रसन्नतया तण्डुलान् खादन्ति स्म परन्तु जालेन बद्धाः अभवन्। मृत्युभयेन खगाः अति व्याकुलाः आसन्। तदा तेषु एकः वृद्धः कपोतः एकम् उपायम् असूचयत् तेषाम् उत्साहवर्धनञ्च अकरोत्। ते सर्वे मिलित्वा जालेन सह स्वमित्रस्य मूषकस्य समीपम् अगच्छन्। सः जालं दन्तैः अकर्तयत्। अन्ते सर्वे पक्षिणः स्वतन्त्राः भूत्वा अनृत्यन् अगायन् च – 'सुखं तु एकतायाम् एव विद्यते। आपदां तरणिः धैर्यम् इति।'

**अ. एकपदेन उत्तरत –**

(i) विशालवृक्षे के वसन्ति स्म ?

(ii) खगानां मित्रं कः आसीत् ?

(iii) सुखं कुत्र विद्यते ?

**आ. पूर्णवाक्येन उत्तरत -**

(i) खगाः किमर्थं भ्रमन्ति स्म ?

(ii) खगाः स्वतन्त्राः भूत्वा किम् अकुर्वन् ?

(iii) खगाः किमर्थं व्याकुलाः आसन् ?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**ई. यथानिर्देशम् उत्तरत -**

(i) 'मृत्युभयेन खगाः अति व्याकुलाः आसन्।'   अत्र विशेष्यपदं किम्?

(क) मृत्युभयेन   (ख) खगाः   (ग) व्याकुलाः   (घ) आसन्

(ii) ‘परतन्त्राः’ इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) व्याकुलाः (ख) बद्धाः (ग) बुभुक्षिताः (घ) स्वतन्त्राः

(iii) एकस्मिन् वने एकः विशालः वृक्षः आसीत्। अत्र आसीत् इति क्रियापदस्य कर्तृपदं किम् ?

(क) वने (ख) एकस्मिन् (ग) वृक्षः (घ) विशालः

(iv) “ते तत्र गत्वा प्रसन्नतया तण्डुलान् खादन्ति स्म।” अत्र क्रियापदं किम्?

(क) ते (ख) प्रसन्नतया (ग) तण्डुलान् (घ) खादन्ति स्म

**(2) (अ) चित्रं दृष्ट्वा प्रदत्तानां शब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन कुरुत।**



**मञ्जूषा**

| |
|---|
| ज्ञानवर्धनाय, आवश्यकम्, पुस्तकालये, अनेकानि पश्यन्ति, कुर्वन्ति, अनेकेषाम्, सन्ति, विषयाणाम्, पठन्ति, स्वाध्यायम्, बालाः, अध्ययनम्, पुस्तकानि। |

**(आ) ‘सन्तुलित-आहारस्य महत्त्वम्’ इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत। सहायतायै मञ्जूषायां पदानि दत्तानि।**

| |
|---|
| भोजनम्, रोटिकाः, सूपम्, ओदनम्, दुग्धम्, शाकाहारी, शाकम्, जनाः, अधुना, स्वच्छ-जलम्, सम्पूर्णखनिजाः, विटामिन्स इत्यादयः, भोजनात् पूर्वम्, स्वच्छीकृत्य, हस्तौ। |

## (3) मञ्जूषायाः सहायतया अधोलिखितं संवादं पूरयत –

**सुदर्शनः** - नमस्ते। आगच्छतु भवान्। उपविशतु।

**अतिथिः** - (i) ________________________________________।

**सुदर्शनः** - स तु इदानीम् एव चिकित्सालयम् अगच्छत्।

**अतिथिः** - (ii) ________________________________________।

**सुदर्शनः** - नास्ति विशेषं कारणम्। स प्रतिदिनं रुग्णेभ्यः दुग्धं दातुं तत्र गच्छति।

**अतिथिः** - एवम् दुग्धं दातुम् ! किं प्रतिदिनम् एव ? महान् परोपकारः अस्ति।

**सुदर्शनः** - (iii) ________________________________________।

**अतिथिः** - धन्योऽहं यत् एतेषाम् अद्य दर्शनं भविष्यति।

**सुदर्शनः** - (iv) ________________________________________।

**अतिथिः** - कार्यालयं कदा गच्छति ?

**सुदर्शनः** - प्रतिदिनम् अष्टवादने एव।

**अतिथिः** - श्वः अष्टवादने एव आगमिष्यामि। कृपया निवेदय तस्य बालमित्रं सुरेन्द्रः आगतः आसीत्।

**सुदर्शनः** - (v) ________________________________________। **मञ्जूषा**

- अवश्यमेव कथयिष्यामि।
- किम् अत्र परोपकारः। एतत् तु अस्माकं कर्तव्यम् एव।
- उपविशामि तावत्। भवतः पितृमहोदयाः गृहे न सन्ति किम् ?
- नहि, नहि। अद्य दर्शनं न भविष्यति यतः सः ततः एव कार्यालयं प्रति गमिष्यति।
- किमर्थं चिकित्सालयम् अगच्छत् ?

## (4) अधोलिखितकथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-

एकदा राजकुमारः सिद्धार्थः विहारार्थम् (i) _______ गतः। सहसा क्रन्दनध्वनिं (ii) ________ सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतत् दृष्ट्वा (iii) _______ चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य (iv) __________ बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते (v) ________ दृष्ट्वा सः उच्चैः अवदत् - "सिद्धार्थ! एषः मम हंसः मया (vi) _______ निपातितः। अतः माम् देहि।" सिद्धार्थः दृढ़तया अवदत्- "अहं न (vii) _______। अहं अस्य (viii) _________ अस्मि।" तदा तौ विवादं कुर्वन्तौ (ix) _______ गतौ। राजा सर्वं वृतान्तम् आकर्ण्य आदिशत् - "यस्य समीपे हंसः (x) _________ तस्यैव भविष्यति।" हंसः सिद्धार्थस्य समीपं गतवान्। सत्यमिदम् - भक्षकात् रक्षकः श्रेयान्।

**मञ्जूषा**

| |
|---|
| रक्षकः, हंसम्, राजसभाम्, उपवनम्, आगमिष्यति, शरीरात्, श्रुत्वा, सिद्धार्थस्य, दास्यामि, बाणेन। |

**गेल डी ए वी पब्लिक विद्यालयः**
**कार्यफलकम् संख्या –2**
**संस्कृतम्   कक्षा नवमी 2026–27**

**( 1)   वर्णसंयोजनं /विन्यासं कृत्वा पदं लिखत।**

**(i)**   म् + अ + न् + द् + इ + र् + अ + म् = -------------

**(ii)**   व् + इ + द् + य् + आ. = -------------

**(iii)**   सुरभिः = ---------------

**(iv)**   मधुरम् = ---------------

**( 2)   रेखांकित पदेषु सन्धिं/विच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत–**

**(i)**   **सूर्य + उदये** कमलानि विकसन्ति।

**(ii)**   **महर्षिः** दयानन्दः सत्यार्थप्रकाशं रचितवान्।

**(iii)**   **पुस्तक + आलये** पुस्तकानि भवन्ति।

**(iv)**   मम विद्यालये **वार्षिकोत्सवः** भविष्यति।

**(3) उपपदविभक्त्याः आधारेण उचितविकल्पेन रिक्तस्थानानि पूरयत -**

**(i)** एषः बालः ________________सह शास्त्रार्थम् अपि करिष्यति।

(क) अस्मासु   (ख) अस्मान्   (ग) अस्माकम्   (घ) अस्माभिः

**(ii)** हे श्वेतकेतो! त्वं _____________प्रति गच्छ ।

(क) गुरुणा   (ख) गुरुभ्याम्   (ग) गुरुम्   (घ) गुरवः

**(iii)** अष्टावक्रः प्रत्यवदत् "जननि! अलम् _________।

(क) चिन्तया   (ख) चिन्तासु   (ग) चिन्तायाः   (घ) चिन्तायै

**(iv)** ______________ अधः स्थितिर्भवति।

(क) पयोधिम्   (ख) पयोधी   (ग) पयोधीनाम्   (घ) पयोधिः

**(4)   उचितैः शब्दरूपैः रिक्तस्थानानि पूरयत -**

**(i)** अहमपि ______________ विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि ।

(क) भवता   (ख) भवताम्   (ग) भवन्तौ   (घ) भवान्

**(ii)** अष्टावक्रः _______________ अपृच्छत्।

(क) जननी (ख) जनन्या (ग) जननीम् (घ) जनन्यै

**(iii)** काव्यरचनायां महाकवितुल्यः _______________ अभ्यासः नास्ति।

(क) माम् (ख) मह्यम् (ग) आवाम् (घ) मम

**(iv)** सा भिक्षाम् आदाय _______________ अन्तिकम् आगता।

(क) मुनेः (ख) मुनिना (ग) मुनये (घ) मुनिम्

**(v)** ......................... मातुः नाम कौशल्या आसीत्।

(अ) रामेण (ब) रामे (स) रामः (द) रामस्य

**(vi)** पक्वानि ............ मधुराणि भवन्ति।

(अ) फलम् (ब) फलानि (स) फलस्य (द) फले

**(vii)** वायुवेगेन ............ नमन्ति ।

(अ) लता (ब) लते (स) लता (द) लताम्

**(vii)** ग्रीष्मकाले जनाः पक्वानां ............ रसं पिबन्ति।

(अ) फलात् (ब) फलेभ्यः (स) फलेन (द) फलानाम्

## (5) उचितैः धातुरूपैः रिक्तस्थानानि पूरयत -

(i) यथा _________________भवद्भ्यः।

(क) रोचते (ख) रोचन्ते (ग) रोचेते (घ) रोचे

(ii) महर्षेः आरुणेः पुत्रः श्वेतकेतुः _____________।

(क) आसन् (ख) आस्ताम् (ग) आसीः (घ) आसीत्

(iii) वीरगत्या मरणमेव कल्याणप्रदं ___________।

(क) भवथः (ख) भवति (ग) भवामि (घ) भवावः

(iv) अष्टावक्रः राजानं सविनयं _______________।

(क) प्रणमेयुः (ख) प्रणमेयम् (ग) प्रणमेत् (घ) प्रणमेम

**(i)** भक्ताः अयोध्यां ..............।

(अ) गमिष्यति (ब) गमिष्यन्ति (स) गमिष्यामि (द) गमिष्यावः

**(ii)** अहम् अष्टमी कक्षायां ................................।

(अ) पठति (ब) पठन्ति (स) पठसि (द) पठामि

**(iii)** बालकाः सुन्दरं चित्रं ..............।

(अ) पश्यन्तु (ब) पश्य (स) पश्य (द) पश्यत

**(iv)** छात्राः प्रतिदिनं संस्कृतस्य पुस्तकं ..............।

(अ) पठेत् (ब) पठेयुः (स) पठे (द)

**(6) भवतः नाम हितेशः अस्ति। भवान् छात्रावासे वसति। अजन्ता-ऐलोरागुहासु शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखिते पत्रे मञ्जूषातः रिक्तस्थानानि उचितैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।**

25, रङ्गहरिः छात्रावासः

(i) _________

तिथि _________

परमादरणीयाः (ii) _________

सादरं प्रणमामि।

सविनयम् (iii) _________यत् मम अर्धवार्षिकी परीक्षा समाप्ता। मम (iv) _________ शोभनानि अभवन्। अस्मिन् (v) _______ अहं गृहं न आगमिष्यामि यतः विद्यालयेन एकस्मिन् (vi) ________ प्रबन्धः कृतः। एषा यात्रा अजन्ता-ऐलोरा-गुहानां (vii) _______ आयोजिता अस्ति। कृपया यात्राव्यथार्थं (viii) _______ रुप्यकाणि प्रेषयन्तु भवन्तः। शेषं सर्वं कुशलम्। (ix) _________ अग्रजाय च सादरं प्रणामाः।

भवदीय : (x) _______

हितेशः

**मञ्जूषा**

| |
|---|
| दर्शनाय, निवेदयामि, प्रियपुत्रः, शैक्षिकयात्रायाः, पञ्चशतम्, रामेश्वरतः, शरदावकाशे, जनन्यै, उत्तरपत्राणि, तृमहाभागाः। |